International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 133-136
© 2019 IJSR
www.anantaajournal.com
Received: 04-09-2019
Accepted: 08-10-2019

**Abhay Singh**
Research Scholar, Department of Sanskrit, Delhi University, Delhi, India

**Corresponding Author:**
**Abhay Singh**
Research Scholar, Department of Sanskrit, Delhi University, Delhi, India

# अकथितं चेति सूत्रार्थविचार

**Abhay Singh**

**प्रस्तावना**

वेदाङ्गेषु प्रमुखं व्याकरणम्। मुखं व्याकरणं स्मृतमिति भाष्योक्तिः[1]। मुखमिव प्रधानत्वात् मुख्यः प्रथम इत्यर्थः। छान्दसं व्याकरणं, लौकिकं व्याकरणम्, छान्दसलौकिकं व्याकरणमित्येवं व्याकरणस्य भेदत्रयम्। कानिचन लौकिकशब्दानामेव व्युत्पादकानि, कानिचित् वैदिकानामेव व्युत्पादकानि। पाणिनीयव्याकरणं तु उभयव्युत्पादकतया छान्दसलौकिकमित्युच्यते। सत्स्वपि बहुषु व्याकरणेषु पाणिनीयमेव भजते लोकः। व्याकरणस्यास्य प्रक्रियाप्रस्थानम्, आर्थिकप्रस्थानमिति द्वयी गतिः। प्रकृतिप्रत्ययविभागद्वारा शब्दसंस्कारमाद्यम्। प्रकृतिप्रत्ययचिन्तनमेव आर्थिकप्रस्थानमित्युच्यते। आर्थिकप्रकरणे च विभक्त्यर्थविचारः सर्वातिशायी दृश्यते। तत्र हि—

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणे इत्याहुः कारकाणि षट्।।

इत्युक्तरीत्या षट् कारकाणि प्रतिपादितानि। तत्र द्वितीयाविभक्तिप्रयोजककर्मसंज्ञाविधायकानि नव सूत्राणि दृश्यन्ते कारकप्रकरणे—

- कर्तुरीप्सिततमं कर्म[2]
- तथायुक्तं चानीप्सितम्[3]
- अकथितं च[4]
- गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ[5]
- हृक्रोरन्यतरस्याम्[6]
- क्रुधद्रुहोरुपसृष्टयोः कर्म[7]
- अधिशीङ्स्थासां कर्म[8]
- अभिनिविशश्च[9]
- उपान्वध्याङ्वसः[10]

तत्र क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इति सूत्रेण प्राप्तस्य सम्प्रदानस्य कर्मसंज्ञाविधायकं क्रुधद्रुहोरुपसृष्टयोः कर्म इति सूत्रम्। अधिशीङ्स्थासां कर्म,अभिनिविशश्च, उपान्वध्याङ्वसः इतीमानि सूत्राणि आधारस्य कर्मसंज्ञां विदधते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ, हृक्रोरन्यतरस्याम् इति सूत्रे द्वे अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मत्वं विदधाते।

---

1 महाभाष्य पस्पशाह्निकम् पृ. 10
2 अष्टाध्यायी 1.4.49
3 अष्टाध्यायी 1.4.50
4 अष्टाध्यायी 1.4.51
5 अष्टाध्यायी 1.4.52
6 अष्टाध्यायी 1.4.53
7 अष्टाध्यायी 1.4.38
8 अष्टाध्यायी 1.4.46
9 अष्टाध्यायी 1.4.47
10 अष्टाध्यायी 1.4.48

कर्तृनिष्ठव्यापारजन्यफलाश्रयस्य कर्मसंज्ञाविधायकं मुख्यं सूत्रं कर्तुरीप्सिततमं कर्म इति। द्वेष्योदासीनकर्मसंग्रहार्थं तथायुक्तं चानीप्सितम् इति सूत्रं प्रणीतम्।
अपादानादीनामप्रसक्तौ कर्मसंज्ञां विदधाति अकथितं च इति सूत्रम्। तदिदं सूत्रमत्र विचार्यते।

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति कौमुद्यां सूत्रार्थो वर्णितः। कथ 'वाक्यप्रबन्धे' धातोः निष्ठाप्रत्यये इडागमे कथितम्, न कथितम् अकथितम् इति अकथितशब्दस्य प्रक्रिया। कथनस्य कारणाकाङ्क्षायाम्, अपादानादिविशेषकथाभिः इति आकांक्षोपशमनम्।

### अत्रेयं विचारणा—

अकथितशब्दोऽयम् अप्रधानवाची रूढ उत असङ्कीर्तितपरः क्रियाशब्द इति। क्रिया तु उभयथाप्याश्रीयते। केन अकथितम्,अपादानादिविशेषकथाभिः इत्येवं भाष्यकृत्कृताभ्यां प्रश्नप्रतिवचनाभ्याम् अकथितशब्दः असङ्कीर्तितपरः क्रियाशब्द एव आश्रीयते न त्वप्रधानवाची रूढः इति निर्णीयते। रूढशब्दोऽपि क्रियाश्रीयते इति सत्यं, किन्तु व्युत्पत्त्यर्थमेवोपादीयते सा न तु प्रवृत्तिनिमित्तत्वेन। रूढिशब्दत्वाश्रयणे प्रश्नप्रतिवचने भाष्यकृत्कृते असंगते स्याताम्।
यथा गोशब्दः सास्नादिमति रूढः। गच्छतीति गौः इति व्युत्पत्तिराश्रीयते क्रियारूपेण 'गच्छति' इत्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचनं भवति। गौः इत्युक्ते प्रश्नप्रतिवचने न सम्भवतः। तथेहापि प्रश्नप्रतिवचनसामर्थ्यात् असंकीर्तितवचन एवाकथितशब्दः। तत्रासङ्कीर्तितत्वं च द्वेधा व्यवस्थापितम्। क्वचित्प्रसक्तस्याप्यपादानादेः अपादानत्वादिरूपेण अविवक्षितत्वम्। क्वचिच्च सर्वथैव अपादानादिप्रसक्तिराहित्यम्। गां दोग्धि पयः इत्यत्र प्राप्तस्याप्यपादानस्याविवक्षायां प्रकृतसूत्रेण गोः कर्मत्वम्। बलिं याचते वसुधाम् इत्यत्र बलेः अपादानत्वाप्राप्तौ प्रकृतसूत्रेण कर्मत्वम् इत्येवमस्य सूत्रस्य विषयः सिद्धः। तत्र प्रथमकल्पे तावत् अपादानादेः सर्वथा अप्रसक्तौ कर्मसंज्ञानेन विधीयते इति मतमालम्ब्य विचारः प्रवर्तते।

### उदाहरणपरिगणनम्

नेन्वेवं नटस्य शृणोति इत्यत्रातिप्रसंगः। अत्र च सर्वथा अपादानत्वादीनामप्रवृत्तिः। तथा हि—गीतद्वारा नटस्य क्रियाजनकत्वमस्ति। नटस्य अपादानत्वं तु कदापि न भवति। आख्यातोपयोगे इति सूत्रेण तत्र अपादानत्वं वक्तव्यम्। तदेव न शक्यं, सूत्रे उपयोगग्रहणेन नियमपूर्वकविद्यास्वीकारे एव तस्य सूत्रस्य प्रवृत्तिः। न च उपयोगे इति प्रत्याख्यायते, ततश्च अपादानप्रसक्तिरस्तीति वाच्यम्, उपयोगग्रहणस्य प्रत्याख्यानेऽपि युक्तत्वात्। अन्यथा उपयोगग्रहणप्रत्याख्याने नटात् शृणोतीति प्रयोगः, उपयोगग्रहणे तदभावः इति आरम्भप्रत्याख्यानयोः फलभेदः स्पष्ट एव। एवं च शृणोति इत्यत्र कर्मत्वापत्तिवारणाय परिगणनं क्रियते।

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।।

दुह प्रपूरणे, याचृ याच्ञायाम्, रुधिर् आवरणे, प्रच्छ ज्ञीप्सायाम्, भिक्ष भिक्षायामलाभे लाभे च, चिञ् चयने, ब्रूञ् व्यक्तायां वाचि, शासु अनुशिष्टौ एतेषां प्रयोगे उपयोगनिमित्तस्य गवादेः अपादानादिपूर्वविधीनामप्रवृत्तौ अकथितं च इति सूत्रेण कर्मत्वं भवति इत्यर्थः। अत्र उपयुज्यते इति उपयोगपदेन प्रधानं कर्म ग्राह्यम्। तस्य निमित्तम् इत्यनेन धात्वर्थव्यापारात् प्राक् सम्बद्धत्वं विवक्षितम्।

> दुह्—गां दोग्धि पयः। याच्—पौरवं गां याचते।
> रुध्—व्रजमवरुणद्धि गाम्।
> प्रच्छ्—माणवकं पन्थानं पृच्छति। भिक्ष—पौरवं गां भिक्षते।
> चिञ्—वृक्षमवचिनोति फलानि। ब्रूञ्—माणवकं धर्मं ब्रूते। शासु—माणवकं धर्ममनुशास्ति इत्युदाहरणानि।

गां दोग्धि पयः इत्यत्र क्रियाजन्यफलाश्रयत्त्वरूपमुख्यकर्मत्वं पयस एव न तु गोरिति अप्राप्ता कर्मसंज्ञा अनेन विधीयते। अत्र कैयटः दोहेनाप्यमानत्वेऽपि गोरीप्साप्रकर्षाभावात्, कर्मसंज्ञासूत्रे तमब्ग्रहणात् प्रकर्षस्य विवक्षितत्वात् अप्राप्ता कर्मसंज्ञा अनेन विधीयते इत्याह। विभागजन्यसंयोगानुकूलव्यापारानुकूलव्यापारस्य दुहधात्वर्थत्वे कैयटमतमिदम्। ततः उद्देश्यत्वाभावात् व्यापारद्वयजन्यफलाश्रयत्वाभावाच्च गोः कर्मत्वं नास्ति तत्तु पयस एव इत्यर्थः। आकडारासूत्रस्थभाष्यविरोधात् कैयटमतमिदं चिन्त्यमिति नागेशोऽभिप्रैति। गां दोग्धि पयः, परत्वात् कर्तुरीप्सिततममिति कर्मत्वमिति आकडारासूत्रे भाष्ये। तत्र सूत्रे धातूपात्त–फलाश्रयत्वरूपस्यैव ईप्सिततमत्वस्य ग्रहणम्। अतः पयोनिष्ठविभागजन्यसंयोगानुकूलव्यापारो दुहेरर्थः। अतः ईप्साप्रकर्षाभावात् कर्मत्वं नेति कैयटमतं तु भाष्यविरुद्धमिति नागेशाभिप्रायः। पौरवं गां याचते इत्यत्र पौरवेण गां दिदापयिषिते इत्यर्थः प्रतीयते। अत्र गोरेव ईप्सिततमत्वं न पौरवस्येति अप्राप्ता कर्मसंज्ञा अनेन विधीयते। व्रजमवरुणद्धि गाम् इत्यत्र गौः व्रजं प्रविशति, गवा व्रजं प्रवेशयति इत्यर्थः। अत्रापि व्रजस्य अप्राप्तं कर्मत्वं सूत्रेणानेन विधीयते। माणवकं पन्थानं पृच्छतीत्यत्र माणवकेन पन्थानम् आचिख्यापयिषति। तत्रा जिज्ञासितकार्यज्ञानानुकूलव्यापारे विषयतया ज्ञानरूपपफलाश्रयत्वात् पन्थाः प्रधानकर्म। माणवकस्य तु अप्राप्ता सा प्रकृतसूत्रेण विधीयते। पौरवं गां भिक्षते इत्यत्र प्रार्थनार्थस्य भिक्षेः गौरेव मुख्यं कर्म भवतीति पौरवस्य अप्राप्तायां कर्मसंज्ञायाम् अनेन कर्मत्वविधिः।
वृक्षमवचिनोति फलानि इत्यत्र वृक्षेण फलानि त्याजयतीत्यर्थः।
माणवकं धर्मं ब्रूते अनुशास्ति वेत्यत्र माणवको धर्मं प्रतिपाद्यते माणवकं धर्मं प्रतिपादयतीत्यर्थः। तत्र व्यापारप्रयोज्यबोधनविषयत्वात् धर्मः प्रधानकर्म, माणवकस्य तु अप्राप्तं तत् सूत्रोणानेन विधीयते।

### पूर्वविधीनां सर्वथा अप्रसक्तौ अकथितकर्मत्वप्राप्तिवादिनो मतम्

गां दोग्धि पयः इत्याद्युदाहरणपंचकमयुक्तम्। तथा हि गां दोग्धि पय इति वाक्यात् गोः सकाशात् पय आदत्ते इत्यर्थावगमात् विश्लेषाश्रयत्वेन गोरपादानत्वम्। एवं च अपादानसंज्ञा कथिता इति अकथितकर्मत्वस्य प्राप्त्यभावः। 'व्रजमवरुणद्धि गाम्' इत्यत्र गां व्रजे स्थापयतीति सम्प्रत्ययात् स्थानक्रियापेक्षमाधारत्वं व्रजस्यास्तीति कथिता अधिकरणसंज्ञा। अतः अकथितकर्मत्वस्य प्राप्त्यभावः। वृक्षमवचिनोति फलानि इत्यत्र वृक्षात् फलान्यादत्ते इति तात्पर्यावगमात् विभागाश्रयत्वात् वृक्षस्य अपादानत्वम्। अतः कथितत्वादपादानस्य अकथितकर्मत्वयोग्यतात्र नास्ति। माणवकं धर्मं ब्रूते, माणवकं धर्ममनुशास्ति इत्यनयोः वाक्ययोः वचनकर्मणा, अनुशासनकर्मणा च धर्मेण पुत्रस्य अभिप्रेयमाणत्वात् ''कर्मणा यमभिप्रैति स सम्प्रदानम्'' इति सम्प्रदानत्वं भवतीति सम्प्रदानस्य कथितत्वात् अकथितकर्मत्वस्य प्राप्त्यभावः। एवं च पौरवं गां याचते, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते इतीमानि त्रीण्येवोदाहरणानि अकथितं च इति सूत्रस्य भवन्ति। ननु एतान्यपि उदाहरणानि न भवन्ति। तथाहि—पौरव! गां याचते इत्यत्र पौरवाद् गां जिघृक्षते इति सम्प्रत्ययात् विभागाश्रयत्वात् पौरवस्य अपादानत्वम्।
एवं च अपादानस्य कथितत्वात् अकथितकर्मत्वस्य अप्राप्तिरेव। माणवकं पन्थानं
पृच्छति इत्यत्र माणवकात् मार्गोपदेशं जिघृक्षते इति सम्प्रत्ययात् माणवकस्य अवधित्वेन अपादानस्योक्तफलत्वात् अकथितकर्मत्वस्याप्राप्तिः। पौरवं गां भिक्षते इत्यत्रापि पौरवात् गां जिघृक्षते इत्यर्थस्वीकारे अपादानसंज्ञा कथितेति नात्र सूत्रस्य प्रवृत्तिः इति चेत्

**अत्रोच्यते—**

न याचनादेवापायो भवति, यदि याचितोऽसौ ददाति ततोऽपायेन युज्यते। न च बुद्धिकृतापादानस्य प्राप्तिः इति वाच्यम्, याचनकाले याचितुरपि नूनमस्मादिदंवस्तु निर्गत्य मां प्राप्नोतीति ज्ञानाभावात्। अतः सर्वथा अपादानत्वादीनामप्राप्तौ इदमुदाहरणं भवति प्रकृतसूत्रस्य। किं च माणवकं पन्थानं पृच्छति इत्यत्र न प्रश्नादेवापायो भवति, पृष्टोऽसौ यद्याचष्टे ततोऽपायेन युज्यते। अनंगीकृतापायं प्रश्नमात्रं पृच्छधात्वर्थः। एवं च प्रश्नस्य विश्लेषाजनकत्वेन प्रच्छिं प्रति माणवकस्य अपादानत्वं न प्रसक्तमिति अकथितं च इति कर्मत्वं भवति।

एवमेव पौरवं गां भिक्षते इत्यत्र न हि भिक्षणादेवापायो भवति भिक्षितोऽसौ

यदि ददाति ततोऽपायेन युज्यते इत्येवं अपादानस्य अप्रसक्तौ इदम् अकथितं च इति सूत्रस्योदाहरणं भवति।

अत्रेदमवधेयम्—याचतिभिक्षत्योः समानार्थत्वेन अन्यतरोपादानेन सिद्धे उभयोपादानं कुतः? अनुनयार्थस्यापि याचेर्ग्रहणार्थम्, तेन अविनीतं विनयं याचते इत्यत्रापि कर्मसंज्ञा सिद्ध्यति इति कैयटः। भिक्षेरप्युभयार्थत्वेन कैयटोक्तं चिन्त्यम्, किं च उभयार्थक याचिग्रहणेनैव सिद्धे भिक्षिग्रहणमर्थग्रहणाभवे लिंगमिति नागेशः।

उक्तेषु यदि अपायप्रतीतिर्न भवति तर्हि इमानि त्रीणि उदाहरणानि भवन्ति। याचेः स्वत्वनिवृत्तिस्वस्वत्वोत्पत्त्यनुकूलव्यापारविशेषोऽर्थः। तत्र स्वत्वे पौरवस्य जनकता– समानाधिकरणनिरूपकत्वेनान्वयः। एवं भिक्षेरपि। पृच्छेस्तु जिज्ञासाविषयार्थज्ञानानुकूल– व्यापारोऽर्थः। व्यापारे माणवकस्य जनकत्वमात्रेणान्वय इति अप्राप्तकर्मत्वार्थमिदं सूत्रम्। यदि उक्तेषु त्रिष्वप्यपायप्रतीतिः तदा तेष्वपि पूर्वविधिविषयसत्त्वात् तान्यपि नोदाहरणानि इति सूत्रामेवासंगतम्।

**अत्रायं सिद्धान्तपक्षः—**

गां दोग्धि पयः गोः पयो दोग्धि इत्युभयथा प्रयोग इष्यते। असंकीर्तितपर्यायस्य अकथितशब्दस्य ग्रहणात् अपादानादीनां विवक्षाविवक्षाभेदमाश्रित्य, विवक्षायां पंचमी, अविवक्षायां कर्मत्वमिति प्रयोगद्वयमपि साध्यते। पौरवं गां याचते इत्यादिषु त्रिषु कर्मसंज्ञैव, तत्र सर्वथा अपायस्याप्रतीतेः।

यदि तु अप्रधानवाची अकथितशब्दो गृहीतः स्यात् तर्हि अपादानसम्प्रदानाधिकरणसंज्ञा बाधित्वा कर्मसंज्ञैव स्यात्। अतोऽत्र असंकीर्तितवचनोऽकथितशब्दआश्रितः। ततश्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां, सर्वथा पूर्वविधेरप्रसक्तौ च एतत्सूत्रस्य प्रवृत्तिरिति लभ्यते। एवमर्थाश्रयणे गां दोग्धि पयः इत्यादि पंचके पूर्वविधीनां प्राप्तौ, तदविवक्षायां पौरवं गां याचते इत्यादिषु त्रिषु सर्वथा पूर्वविधीनामप्रसक्तौ कर्मत्वमिति सर्वाण्यप्युदाहरणानि युज्यन्ते।

**प्रधानाप्रधानयोः प्रत्ययनिर्णय**

सर्वोदाहरणवादी सिद्धान्ती सूत्रासंगतिवादिनं पृच्छति। ननु ''लः कर्मणि च भावे चाकर्मकेभ्यः'' इति सूत्रेण कर्तरि कर्मणि भावे च लकारा विधीयन्ते। तत्र कर्मणि लादय उत्पद्यमानाः प्रधानं कर्म अप्रधानं कर्म इत्युभयमपि युगपदभिधातुमसमर्थाः सन्तः किं प्रधानकर्मणि भवन्ति उत गुणकर्मणि इति।

**तदत्र समाधानम्**

सूत्रासंगतिवादिनः प्रधानाप्रधानसन्निधौ प्रधानस्यैवाभिधानस्य न्याय्यत्वात् प्रधानकर्मणि लादयो भवन्ति। अथवा अकथितस्य कारकत्वाभावेन तत्र लादयो न भवन्ति। यत्र कर्त्रादिषट्कान्यतमत्वं तत्रैव कारकत्वात्। अकथितकर्म तु कर्त्रादीनां षण्णां सर्वथाप्राप्तौ भवति इति तत्र कारकत्वाभावः। यद्येवं प्रधाने कर्मणि लादयो भवन्ति तर्हि गुणकर्मणि का विभक्तिरिति प्रश्ने गुणकर्मत्वेनाभिमतात्षष्ठी विभक्तिर्भवति, दुह्यते गोः पयः, याच्यते पौरवस्य कम्बलः इति। यतो हि अपादानादिषु विशेषेष्वेव कारकसामान्यं स्थितम्, न तु विशेषरहितस्य सामान्यस्य स्थितिरस्ति। अकथिते कारकत्वाभावात् षष्ठी भवति इति भावः। एवं च सूत्रमिदमसंगतमेवेत्याशयः।

ननु यदा अपादानत्वादिविशेष आश्रीयते तदा सामान्यस्यापि स्थितिरस्तीत्यतः तत्र या या विभक्तिः प्राप्नोति सा सा विभक्तिः क्रियते। दुह्यते गोः (पंचमी) पयः, याच्यते पौरवात् कम्बलः इति अत्र गोरपादानत्वम्।

**अत्रेदं तत्त्वम्—**अत्र उदाहरणत्रयवादी—कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत् इत्युक्त्वा गोः पयो दुह्यते इति वाक्येन सह याच्यते पौरवात् कम्बलः इति वाक्यमपि दर्शयामास। अत्र उदाहरणत्रयवादी पौरवस्य कर्मत्वमेवेच्छति। एवं च कृत्वा पौरवादिति स्वोक्तिविरुद्धा खलु? इति चेदत्र कैयट आह न्यायस्य सर्वोदाहरणेषु समानत्वात् पौरवस्याप्यपादानत्वं मन्यते। तथाहि— याच्यते पौरवात् कम्बलः इत्यस्य पौरवात्कम्बलः आदित्स्यते इत्यर्थसम्प्रत्ययात् अस्ति बुद्धिकृतस्याप्यपायस्य सम्भव इति। नागेशस्तु— त्रीण्येवोदाहरणानि इत्यस्य अपायस्याप्रतीतौ त्रीणि, यद्यपायः प्रतीयते तर्हि त पूर्वविधिविषयत्वसत्त्वात् तान्यपि उदाहरणानि न भवन्ति इति व्याख्यामकृत।

ततश्च अस्मिन् मते सूत्रासंगतिरेव। एवं च भाष्ये षष्ठ्युच्चारणं पूर्वपक्षिणो यथा तथा पंचम्युच्चारणमपि। अतः याचियोगे सिद्धान्ते पंचमी भवति इति न मन्तव्यम् इत्याह। इत्थं च सर्वथा पूर्वविधिविषयत्वाभावे अनेन कर्मत्वमिति अंगीकर्तुर्मते सूत्रामेवासंगतम्। पूर्वविधीनां प्रसक्तानामविवक्षायां तु कर्मसंज्ञाविधानाय सूत्रामिदमावश्यकमिति भावः।

**प्रधाने लादिविधिखण्डनम्**

कथिते लादयो भवन्तीति मतं न युक्तम्। ''गुणकर्मणि लादिविधिः सपरे गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रमप्यविहाय गुणकर्मणि लादयो भवन्ति। तथाहि—पयोऽर्थी प्रथमं गवि प्रवर्तते। ततश्च अन्तरंगत्वात् गुणकर्मणि लादयो भवन्ति। ननु अन्तरंगत्वात् गोरेव मुख्यकर्मत्वमस्तु इति चेन्मैवम्, अन्तरंगत्वे सत्यपि गोः ईप्सिततमत्वाभावः अन्यार्थत्वात् क्रियाप्रवृत्तेः पयसोऽविवक्षायां तु गोरेवेप्सिततमत्वम्। पयोविवक्षायां पयसः मुख्यत्वेऽपि अन्तरंगत्वेन गुणे एव लादयो भवन्ति। एवं च गां दोग्धि पयः इत्यत्र गुणे लकारेगौर्दुह्यते पयः इति प्रयोगः। गोः अपादानत्वविवक्षायां तु गोः पयो दुह्यते इति वाक्यम्। यदा तु पयोविशेषणत्वेन गोर्विवक्षा तदा गोः पयो दुह्यते इति।

एवमेव यदा धर्मेण कर्मणा माणवकस्य अभिप्रेयमाणत्वं विवक्ष्यते तदा सम्प्रदानत्वम्, माणवकाय धर्मं ब्रूते इति। तदविवक्षायां तु अनेन कर्मत्वं, माणवकं धर्मं ब्रूते इति।

गतिबुद्धि इत्याद्युत्तरसूत्रेऽपि गुणकर्मणि एवं लादयो भवन्ति इति सपरे इति वचनेनोक्तम्। यथा— बोध्यते माणवकं धर्मः। माणवकं धर्मं बोधयति इति कर्तरिप्रयोगः।

यत्किंचिद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारः बोधयतेरर्थः।

**प्रयोजकव्यापारजन्य–**

फलाश्रयस्य माणवकस्य प्राधान्यम्, प्रयोज्यव्यापारजन्यफलाश्रयो धर्मः गुणकर्म।

ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत। गुणकर्मणि लादिविधिः

सपरे इति कथनेन सामान्येन सर्वत्र द्विकर्मकेषु अप्रधानकर्मणि लकारः प्राप्तः।

तदपवादोऽत्र पठ्यते। ध्रुवयुक्तिषु, चेष्टितयुक्तिषु च प्रधानकर्मणि लादयः भवन्तीत्यर्थः।

अकर्मकाः ध्रुवयुक्तय इति प्राचीनाचार्यैरभिहितम्। एवं च अकर्मकेषु, गत्यर्थकेषु च

प्रधाने कर्मणि लादयो भवन्तीत्यर्थः। यथा मासमास्यते देवदत्तः। देवदत्तः मासमास्ते।

चैत्रो देवदत्तं मासमासयति इति कर्तरि प्रयोगः। अत्र प्रयोजकचैत्राव्यापारजन्यपफलाश्रयत्वेन देवदत्तस्य प्राधान्यम्। तत्रैव लादयो भवन्ति। एवं शाय्यते क्रोशं देवदत्तं इत्यपि।

गत्यर्थस्य यथा–गम्यते ग्रामं देवदत्तः। देवदत्तः ग्रामं गच्छति। मैत्रो देवदत्तं ग्रामं गमयति इति कर्तरि। अत्र प्रयोजकव्यापारजन्यसंयोगानुकूलव्यापाररूपफलाश्रयस्य देवदत्तस्य प्राधान्यात् तत्र लादयः।

**आचार्यान्तरमतम्—**

**प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।**
**अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।**

इति आचार्यान्तरोक्तिः। द्विकर्मणां धातूनां प्रधानकर्मणि लादयो भवन्ति।

यथा अजां ग्रामं नयति। कर्तृव्यापारजन्यफलाश्रयत्वादजायाः प्राधान्यम्। नेतुः तस्यामेव पूर्वं क्रियाप्रवर्तनात् अन्तरंगत्वाच्च तत्रैव लादयः। ततश्च अजा ग्रामं नीयते।

नन्वेवं दुहादीनामपि द्विकर्मकत्वात् तत्र गुणकर्मणि लादयः स्युः इति चेत् न 'अप्रधाने दुहादीनाम्' इति वचनात्। दुहादीनां तु अप्रधाने कर्मणि लादयो भवन्ति इत्यर्थः। यथा गां दोग्धि पयः। व्यापारजन्यफलाश्रयत्वेन पयो मुख्यं कर्म।

अकथितं च इति गोः कर्मत्वविधानात् तस्य गुणभावः। गुणकर्मणि लकारे गौः दुह्यते पयः इति प्रयोगः।

**ण्यन्ते कर्तुश्च कर्मणः—**गतिबुद्धि– इत्यनेन अस्य प्रयोज्यस्य कर्मसंज्ञा विधीयते, तस्मिन् वाच्ये गत्यर्थादिषु धातुषु लादयो भवन्ति इत्यर्थः। यथा देवदत्तः यज्ञदत्तं ग्रामं गमयति। अत्र अण्यन्तावस्थायां कर्तुः यज्ञदत्तस्य ण्यन्तावस्थायां कर्मसंज्ञा विहिता। तत्रैव लकारः, कर्मणि विधीयमानः। देवदत्तेन यज्ञदत्तः ग्रामं गम्यते इति प्रयोगः।

कथितेऽभिहिते इत्यादिपूर्वश्लोके अकर्मकाणां गत्यर्थकानां च प्रधाने कर्मणि लादयो भवन्ति इत्युक्तम्। सपरे इति वचनेन गत्यर्थकान् अकर्मकांश्च विहाय अन्येषां गतिबुद्धिसूत्रोक्तानाम् अर्थात् बुद्धिप्रत्यवसानार्थशब्दकर्मणां गुणकर्मणि लादयो भवन्ति इत्यभिहितम्। प्रधानकर्मण्याख्येये इति आचार्यान्तरश्लोके तु ण्यन्ते कर्तुश्च कर्मणः इति वचनेन ण्यन्ते सर्वत्र प्रधानकर्मणि लादयः इत्यभ्यधायि। एवं च बुद्धिप्रत्यवयानार्थशब्दकर्मकेषु प्रधाने कर्मणि, अप्रधाने कर्मणीति विकल्पः फलितः।

माणवकं धर्मं बोधयति इत्यत्र गुणप्रधानभावोऽनियतः। वाक्यस्य धर्मप्रतिपादनपरत्वे धर्मस्य प्राधान्यं, माणवकस्य गुणभावः, वाक्यस्य माणवकसंस्कारपरत्वे तु माणवकस्य प्राधान्यं, धर्मस्य गुणभावः।

**द्विकर्मकधातुनिर्णयः—**

'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति आचार्यान्तरश्लोकव्याख्याने अजा ग्रामं नीयते इति नीञ् धातुरुदाहृतः। कथं तस्य द्विकर्मकत्वेन ग्रहणम्? इति चेदुच्यते भाष्ये दुह्यादिपरिगणनादन्यत्र द्विकर्मकता न स्यादित्याशंक्य के पुनर्द्विकर्मकाः इति प्रश्नं विधाय—

'नीवह्योर्हरतेश्चापि गत्यर्थानां निजेच्छया।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।।'

अजां नयति ग्रामम्, भारं वहति ग्रामम्, भारं हरति ग्रामम्, गमयति देवदत्तं ग्रामम् इति समाहितम्।

अत्रा कैयटः— नीवह्योरिति भाष्ये चकारेण जयत्यादयोऽन्ये द्विकर्मकत्वेन समुच्चीयन्ते, तेन शतं जयति देवदत्तम्, शतं मुष्णाति देवदत्तम्, शतं दण्डयति देवदत्तम् इत्यादि सिद्धमित्याह। दीक्षिता अपि षोडशधातून् पेठुः दुहादिषु।

नागेशस्तु व्यापारद्वयार्थकतया, कर्तुरीप्सिततमं कर्म इति यत्र द्वयोः कर्मत्वं तेऽत्र द्विकर्मका उच्यन्ते, नीवह्योर्हरतेः इत्यादिकारिका तु व्यापारद्वयार्थकधा–

तूपलक्षणार्थम्, न त्वेषां दुह्यदिषु पाठे मानमस्ति इत्याह।
इत्थं महाभाष्यमाश्रित्य अकथितं च इति सूत्रार्थविचारः निरूपितः।

**सन्दर्भ–ग्रन्थ–सूची**


1. आचार्य, सुदर्शनदेव. पाणिनीय अष्टाध्यायी प्रवचनम् प्रथम संस्करण, झज्जरः ब्रह्मर्षि स्वामी विरजानन्द आर्ष धर्मार्थ न्यास गुरुकुल झज्जर, 1999.
2. आचार्य, प्रद्युम्न. पारिभाषिक. प्रथम संस्करण, सोनीपतः रामलाल कपूर ट्रस्ट, 2001.
3. जयादित्यवामन, काशिका पदमञ्जरी न्यास सहित. सप्तम भाग, सं. जयशंकर लाल त्रिपाठी, प्रथम संस्करण, वाराणसीः तारा बुक एजेन्सी, 1990.
4. जयादित्यवामन. काशिका. सं. विजयपाल विद्यावारिधि, प्रथम संस्करण, सोनीपतः रामलाल कपूर ट्रस्ट, 1997.
5. पाणिनि. अष्टाध्यायी. सं. ब्रह्मदत्त जिज्ञासु, सत्रहवां संस्करण, दिल्लीः रामलाल कपूर ट्रस्ट, 2005.
6. पतञ्जलि. महाभाष्य प्रदीप उद्योत सहित. सं. श्री भार्गव शास्त्री, दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान, 1987.
7. पतञ्जलि. महाभाष्य प्रदीप उद्योत सहित. सं. श्री वेदव्रत, प्रथम संस्करण, झज्जरः हरियाणा साहित्य संस्थान, गुरुकुल झज्जर, 2000.
8. पतञ्जलि. महाभाष्य प्रदीप उद्योत सहित. सं. गुरुप्रसाद शास्त्री, द्वितीय संस्करण, दिल्लीः प्रतिभा प्रकाशन, 1999.